**Nepal Sanskrit University** Symbol No.:______________

# प्राक्शास्त्री
## २०७९

**विषयः :- ऐच्छिकवेदः**

**पत्रम् :- तृतीयम्** **समयः - २० मिनेट**

---

**खण्ड-क**

**समीचीनोत्तरस्य प्रकोष्ठे सत्यम् ☑ इति संकेतो देयः –** **२०x१=२०**

१. शुक्लयजुर्वेदान्तर्गताः शाखाः कति सन्ति ?
(क) २ ☐ (ख) ९ ☐ (ग) २१ ☐ (घ) ३१ ☐

२. होता कस्य वेदस्य अध्येता भवति ?
(क) ऋग्वेदस्य ☐ (ख) यजुर्वेदस्य ☐ (ग) सामवेदस्य ☐ (घ) अथर्ववेदस्य ☐

३. शौनकशाखा केन सह सम्बद्धा ?
(क) ऋचा ☐ (ख) यजुषा ☐ (ग) साम्ना ☐ (घ) अथर्वणा ☐

४. माध्यन्दिनीयशाखाया अपरं नाम किम् ?
(क) काण्वशाखा ☐ (ख) कौथुमी शाखा ☐ (ग) शौनक शाखा ☐ (घ) वाजसनेयी ☐

५. सूर्येणोपदिष्टा संहिता का ?
(क) कौथुमी ☐ (ख) वाजसनेयी ☐ (ग) शौनकी ☐ (घ) तैत्तिरीया ☐

६. यजुर्वेदस्य प्रतिपाद्यो विषयः कः ?
(क) ज्ञानम् ☐ (ख) उपासना ☐ (ग) कर्म ☐ (घ) स्तुतिः ☐

७. ऋग्वेदस्य प्रथमः अध्येता व्यासशिष्यः क आसीत् ?
(क) वैशम्पायनः ☐ (ख) पैलः ☐ (ग) जैमिनिः ☐ (घ) सुमन्तुः ☐

८. त्रिष्टुप् इति पदेन किं बुद्ध्यते ?
(क) यज्ञः ☐ (ख) देवता ☐ (ग) ऋषिः ☐ (घ) छन्दः ☐

९. वेदाङ्गज्योतिषस्य रचयिता कः ?
(क) वराहमिहिरः ☐ (ख) भास्कराचार्यः ☐ (ग) लगधः ☐ (घ) याज्ञवल्क्यः ☐

१०. याज्ञवल्क्यशिक्षा कस्योच्चारणविधानं शिक्षयति ?
(क) ऋग्वेदस्य ☐ (ख) माध्यन्दिनीय यजुषः ☐
(ग) साम्नः ☐ (घ) अथर्वस्य ☐

११ वृहदारण्यकोपनिषद् कस्य वेदस्य उपनिषदस्ति ?
(क) ऋक् ☐ (ख) यजुः ☐ (ग) साम ☐ (घ) अथर्व ☐

१२. वेदपुरुषस्य अङ्गेषु पादस्थानीयम् अङ्गं किम् ?
(क) व्याकरणम् ☐ (ख) ज्योतिषम् ☐ (ग) निरुक्तम् ☐ (घ) छन्दः ☐

**क्रमशः**

१३. समावर्तनात् पूर्वं विधीयमानः संस्कारः कः ?
(क) उपनयनम् ☐ (ख) वेदारम्भः ☐ (ग) गोदानम् ☐ (घ) विवाहः ☐

१४. वेदशब्दस्य पर्यायः कः ?
(क) श्रोत्रम् ☐ (ख) श्रौतम् ☐ (ग) श्रुतिः ☐ (घ) श्रवणम् ☐

१५. प्रकृतिपाठस्य कति भेदाः सन्ति ?
(क) ३ ☐ (ख) ५ ☐ (ग) ८ ☐ (घ) १० ☐

१६. पाठदोषाः कति सन्ति ?
(क) १० ☐ (ख) १२ ☐ (ग) १४ ☐ (घ) १६ ☐

१७. सत्यं वद, धर्मं चर इत्युक्तिः कस्या उपनिषदः अस्ति ?
(क) ईशावास्यस्य ☐ (ख) केनोपनिषदः ☐
(ग) तैत्तिरीयोपनिषदः ☐ (घ) छन्दोग्योपनिषदः ☐

१८. निरुक्तस्य रचयिता कः ?
(क) उव्वटः ☐ (ख) महीधरः ☐ (ग) यास्कः ☐ (घ) सायणः ☐

१९. वैदिकयागेषु कस्य ग्रहणं विधीयते ?
(क) सोमयज्ञः ☐ (ख) ज्ञानयज्ञः ☐ (ग) द्रव्ययज्ञः ☐ (घ) तपोयज्ञः ☐

२०. वेदस्य विभाजनं कः कृतवान् ?
(क) ब्रह्मा ☐ (ख) विष्णुः ☐ (ग) व्यासः ☐ (घ) वाल्मीकिः ☐

–: ० :–

**Nepal Sanskrit University** **[P.S.]**

# प्राक्शास्त्री
## २०७९

पूर्णाङ्काः - १००

विषयः :- ऐच्छिकवेदः उत्तीर्णाङ्काः - ४०

पत्रम् :- तृतीयम् समयः - घण्टात्रयम्

| | |
|---|---|
| (क) | परीक्षार्थिभिः प्रश्नोत्तरं यथासम्भवं स्वकीयैश्शब्दैर्लेखनीयम् । |
| (ख) | दक्षिणपार्श्वे सन्निविष्टा अङ्काः पूर्णाङ्कान् द्योतयन्ति ॥ |

## खण्ड-ख

केषाञ्चन चतुर्दशानां प्रश्नानामुत्तराणि प्रयच्छत– १४×४ = ५६

१. वेदशब्दस्यार्थान् प्रकाशयत ।
२. वेदस्य विभागद्वयं तयोः सम्बन्धञ्च प्रदर्शयत ।
३. वेदस्य शाखाः परिचाययत ।
४. सामवेदस्य वैशिष्ट्यं वर्णयत ।
५. व्याकरणस्य महत्त्वं विलिखत ।
६. संहिता-पद-क्रमपाठफलं निर्दिशत ।
७. यजुर्वेदान्तर्गतवाजसनेयशाखायाः परिचयं प्रयच्छत ।
८. शतपथब्राह्मणे अध्याय-ब्राह्मणकण्डिकासंख्यां लिखत ।
९. वेदोपाङ्गानां नामानि लिखत ।
१०. प्रातिशाख्यस्य परिचयं प्रयच्छत ।
११. अथर्ववेदस्य शौनकशाखायाः परिचयं प्रदत्त ।
१२. सामवेदस्य प्रथमं मन्त्रमुल्लिखत ।
१३. त्रैस्वर्यस्य लक्षणं प्रकाशयत ।
१४. हस्तदोषान् परिगणयत ।
१५. वेदाध्ययनविधिं संक्षिप्य लिखत ।
१६. वेदाध्ययने हस्तसन्निवेशप्रकारं प्रकाशयत ।
१७. वेदोच्चारणे परिहर्तव्यान् दोषान् परिगणयत ।
१८. अभ्यासार्थे द्रुतं वृत्तिमित्यादिश्लोकं पूरयत ।

## खण्ड-ग

केचन त्रयः प्रश्नाः समुत्तरणीयाः । ३×८ = २४

१९. इषेत्वोर्जेत्वा । धूरसि धूर्व धूर्वन्तम् इत्यादिमन्त्रौ सस्वरनिर्देशं पूरणीयौ ।
२०. प्रत्युष्टꣳरक्षः । पुराक्रूरस्य इत्यादिकण्डिके स्वरनिर्देशपूर्वकं पूरणीये ।
२१. समिदसि । मनोजूतिर्जुषताम् इत्यादि कण्डिकाद्वयं सस्वराङ्कनं पूरणीयम् ।
२२. मन्त्रब्राह्मणयोर्वेदनामधेयम् इत्युक्तिं विवृणुत ।
२३. वैदिकच्छन्दसां भेदोपभेदान् वर्णयत ।

–: o :–